# श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, नवदेहली



# शिक्षणाधिगमकेन्द्रम्

## पण्डितमदनमोहनमालवीय-राष्ट्रिय-शिक्षक-शिक्षणयोजना

### शिक्षामन्त्रालयः, भारतसर्वकारः

### चरणम्-V, कार्यक्रमः - 02

### एकदिवसीया-ऑनलाइन-कार्यशाला

# गूगल-प्रपत्र-रचना प्रयोगश्च

**दिनाङ्कः - 29 मई, 2021**

## परिचयः

नवदेहलीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य (केन्द्रीयविश्वविद्यालयस्य) शिक्षणाधिगमकेन्द्रस्य स्थापना **भारतसर्वकारस्य शिक्षामन्त्रालयस्य पण्डितमदनमोहनमालवीय-राष्ट्रिय-शिक्षक-शिक्षणयोजनानन्तर्गतत्वेन** (PMMMNMTT) पाठ्यचर्यायाः शिक्षणशास्त्रस्य च उत्कृष्टताकेन्द्रस्य घटकस्यान्तर्गतत्वेन कृताऽस्ति। एषा योजना शिक्षायाः सर्वस्तरेषु गुणवत्तावर्धनाय आरब्धा। केन्द्रस्यास्य मुख्योद्देश्यमस्ति भाषाशिक्षायाः विशिष्टरूपेण संस्कृताध्यापकेषु अध्यापकशिक्षकेषु च शिक्षणाधिगमप्रणालीनामभिकल्पन-विकास-क्रियान्वयन-मूल्याङ्कनसम्बद्धं च कौशलोत्पादनम्। **इदं केन्द्रं भारतसर्वकारस्य शिक्षामन्त्रालयस्य उच्चशिक्षाविभागेन नवनियुक्तानामध्यापकानां कृते निर्धारितस्य अनिवार्य-मासिक-संकाय-अनुबोधन-कार्यक्रमस्य (FIP) संचालनाय निर्दिष्टेषु 30 नवकेन्द्रेषु चिह्नितमस्ति। केन्द्रमिदं संस्कृतविषये SWAYAM मञ्चमाध्यमेन शिक्षणे वार्षिकपुनश्चर्यापाठ्यक्रमनिर्माणाय Annual Refresher Program in Teaching (ARPIT – 2018, 2019, 2020) राष्ट्रियसंसाधनकेन्द्ररूपेण (NRC) अधिसूचितमस्ति। केन्द्रेणानेन उच्चप्राथमिकस्तरस्य माध्यमिकस्तरस्य च संस्कृतशिक्षणाय पृथक्-पृथक् द्वयोः संदर्शिकयोः प्रकाशनमपि कृतम्। अद्यावधि केन्द्रेण 35 कार्यक्रमाः 3 संकायानुबोधनकार्यक्रमाश्च सफलतया समायोजिताः। पञ्चमचरणस्य सर्वेषां कार्यक्रमाणां संचालनं माननीयकुलपतिमहोदयानां संरक्षणे भविष्यति।**

## सन्दर्भः

कोरोनासंक्रमणकाले शैक्षिकप्रक्रियाणां नियोजनाय, अभिकल्पनाय, क्रियान्वयनाय आकलनाय च डिजिटल-ऑनलाइन मंचः सुरक्षितश्रेष्ठविकल्परूपेण प्रकटितमस्ति। मंचस्यास्य संचालनं विभिन्नानां सॉफ्टवेयर्स-ऐप्स-टूल्स इत्यादीनां प्रयोगेण क्रियते। कस्यामपि शिक्षाप्रणाल्यां सूचनासंकलनं, अधिगमाकलनं प्रतिपुष्टिश्च महत्त्वपूर्णगतिविधयः भवन्ति। एतेषां कृते उपलब्धेषु ई-संसाधनेषु गूगलप्रपत्रं (Google Form) महत्त्वपूर्णः विकल्पः विद्यते। अस्मिन् वेब-आधारिते निशुल्कोपकरणे (टूल) बहुविधाः प्रश्नाः यथा- बहुविकल्पात्मकप्रश्नाः, लघूत्तरात्मकप्रश्नाः, दीर्घोत्तरात्मकप्रश्नाः, चेकबॉक्स, सूचीतः चयनमनुच्छेदश्च, विडियो-चित्राधारिताः अवबोधात्मकप्रश्नाश्च विकल्परूपेण भवन्ति, येषामुपयोगः प्रपत्रस्य उद्देश्यानुगुणं क्रियते। एतदतिरिच्य प्रपत्रस्यास्य वैशिष्ट्यमस्ति यत् अस्मिन् प्राप्तोत्तराणां निरूपणं स्प्रेडशीट-द्वारा कर्तुं शक्यते तथा च उत्तराणां विश्लेषणमपि सारांशरूपेण कर्तुं पारयते। गूगलप्रपत्रस्य निर्माणं, प्रशासनं विनिमयं च सरलतया प्रभवति। अतः गूगलप्रपत्रनिर्माणस्य प्रयोगविधीनाञ्च ज्ञानं शिक्षकाणां शिक्षार्थिनां कृते अत्यन्तमावश्यकं वर्तते। सन्दर्भेऽस्मिन् एकदिवसीयायाः ऑनलाइन-कार्यशालायाः आयोजनं विशेषरूपेण शिक्षार्थिनां कृते एतदर्थं क्रियते येन तेषां गूगलप्रपत्रनिर्माणप्रयोगसम्बद्धानां कौशलानां संवर्द्धनं भवितुं शक्नुयात्।

## उद्देश्यानि

अस्याः कार्यशालायाः इमानि उद्देश्यानि सन्ति -

- गूगलप्रपत्रस्य घटकानां परिचयप्रदानम्।
- गूगलप्रपत्रस्य प्रशासनविधिनां परिचयकरणम्।
- गूगलप्रपत्रे उपलब्धानां बहुविधप्रश्नानां निर्माणम्।
- गूगलप्रपत्रेण प्राप्तसूचनानाम् उत्तराणाञ्च विश्लेषणाय अन्तर्दृष्टेः विकासः।
- गूगलप्रपत्रनिर्माणप्रयोगसम्बद्धानां कौशलानां विकासः।

## लक्ष्यसमूहः

- श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये अध्ययनरताः सर्वे शिक्षार्थिनः।

## पंजीकरणम्

कार्यशालायाः **पंजीकरणशुल्कं ₹100/- (अप्रतिदेयम्)** निर्धारितमस्ति। इच्छुकप्रतिभागिनः https://forms.eduqfix.com/slbsnsuform/home लिंकद्वारा **28 मई, 2021 प्रातः 10 वादनपर्यन्तं** ऑनलाइनपंजीकरणं कर्तुं शक्नुवन्ति। अधिकतमप्रवेशक्षमतानुगुणं पंजीकरणदृष्ट्या एतत् लिंक अंतिमदिनांकतः पूर्वमपि अवरोद्धुं करिष्यते। पंजीकरणं **'पूर्वमागच्छन्तु पूर्वं प्राप्नुवन्तु'** आधारेण भविष्यति।

### सक्रियप्रतिभागतायै अपेक्षितसामग्री -

1. लैपटॉप/ कैमरा-माइक्रोफोन संयुक्त कंप्यूटर/स्मार्टफ़ोन।
2. उत्तम इन्टरनेट कनेक्टिविटी (अन्तर्जाल सम्पृक्तता) न्यूनातिन्यूनं 5 जीबी डाटा स्यात्।

### महत्त्वपूर्णसूचना

ऑनलाइन प्लेटफार्मः **गूगल मीट**

- ✓ प्रतिभागितायै **ऑनलाइन पंजीकरणमावश्यकमस्ति।**
- ✓ कृपया पंजीकरणप्रपत्रे स्वकीयं वैध ईमेल, Whatsapp संख्यां च सूचयन्तु यतोहि कार्यशालासम्बद्धं सर्वमपि सम्प्रेषणं अनयोः माध्यमेन भविष्यति।
- ✓ कार्यशालायाः प्रतिभागिता/ पूर्णता (निष्पादनाधारितं ग्रेड) **ई-प्रमाणपत्रं** प्रदास्यते।

**समन्वयकः संयोजकश्च** — **प्रो. अमितापाण्डेयभारद्वाजः**
**निदेशकः**

**सह-संयोजकः** — **डॉ. दिनेशयादवः**

**कार्यक्रमसुगमकर्तारः** — **श्रीसुरेन्द्रनागरः, श्रीज्ञानचन्दशर्मा, श्रीराकेशकाण्डपालः, श्रीअक्षतडबरालः, श्रीसचिनकुमारश्च।**

**संरक्षकः**
**प्रो. रमेशकुमारपाण्डेयः**
**कुलपतिः**

**आयोजकः**

# शिक्षणाधिगमकेन्द्रम्

**पण्डितमदनमोहनमालवीय-राष्ट्रिय-शिक्षक-शिक्षणयोजना, शिक्षामन्त्रालयः, भारतसर्वकारः**

## श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः

(केन्द्रीयविश्वविद्यालयः), नैक द्वारा 'ए' श्रेण्यां प्रत्यायितः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016
अतिरिक्तसूचनार्थम्-
सम्पर्कसूत्रम् -9891777666, 9716692396, 8285513959
ई-मेलः tlc@slbsrsv.ac.in वेबसाइटः www.slbsrsv.ac.in